ष्टानिष्टचिन्तनमिति” च मनुः। नागबलायां स्त्री। यज—क्त न०त०। अकृतयागे देवादौ।

**अनिष्टिन्** त्रि० न इष्टमनेन यज—भावे क्त ततः इनि न०त०। कृतयागभिन्ने। “अनिष्टिनोवाजपेयेन” इति कात्या० १५,१,२।

**अनिष्पत्र** न० निःसृतं पत्रं पक्षोऽत्र तादृशं न भवति। अनिःसृतपक्षकशरेण वेधनादौ। “विशाख्यां वा स्तोर्णकुच्छ्रितं वा विध्यन्त्यनिष्पत्रमिति” कात्या० १२,२,१२, “अनिष्पत्रमित्यनिःसृतपत्रकं विध्यन्ति क्षत्रिया” इति तद्व्याख्या।

**अनीक** पु०न० अनित्यनेन अन—ईकन् अर्द्धर्चादि। सैन्ये, तस्य हि जीवनरक्षकत्वम्। न नीयते अपसार्य्यतेऽस्मात्। नी-क्विप् ब० कप् ह्रस्वाभावः। युद्धे, ततोहि प्रायोमरणान्नपुनरावृत्तिः। “रथेषु वोऽनीकेष्वधिश्रिय” इति ऋ०८,२०,१२ अनीकेषु सेनामुखेष्विति भा०। “दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्य्योधनस्तदेति” गीता मुखे, तस्य प्राणवायुनिःसारणद्वारत्वात् तथात्वम् “अग्नेरनीकमपआविवेशापामिति” यजु० ८,२४, “अनीकं मुखमिति” वेददीपः।

**अनीकस्थ** त्रि० अनीके युद्धे तिष्ठति स्था—क। युद्धगते सैन्ये।

**अनीकिनी** स्त्री अनीकानां संघः अनीकं युद्धं प्रयोजनतया अस्त्यस्याः वा अनीक+इनि। सेनासंघे हस्त्यादिसंख्याविशेषवत्यां सेनायाञ्च तत्संख्या चोक्ता भारते “एको रथो गजश्चैको नराः पञ्च पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते॥ पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः। त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते॥ त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः। स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः॥ चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनीति”। ततश्च हस्तिनः २१८७। रथाः २१८७। अश्वाः ६५६१। पदातयः १०९३५ समुदिताः २१८७०।

**अनीश** पु० नास्ति ईशो नियन्ता यस्य ब०। सर्वनियन्तरि विष्णौ, स्वामिशून्ये त्रि०। न०त०। ईश्वरभिन्ने “भजेरन् मातृकं रिक्थमनीशास्ते हि जीवतोरिति” मनुः। अस्वतन्त्रे, “एकोह्यनीशः सर्वत्रेति” व्यास स्मृतिः। ईश—भावे अङ् न०त०। दीनभावे स्त्री “निमग्नोऽनीशया शोचतीति” मु०उ०। दीनभावोऽनीशेति भा०।

**अनीश्वर** न० न ईश्वरः नियन्ता यत्र। नियन्तृशून्ये सांख्यादिमते जगति “जगदाहुरनीश्वरमिति” गीता ईश्वरस्य न भवति असम०स०। ईश्वरसम्बन्धिभिन्ने “ध्यानेनानीश्वरान् गुणानिति” मनुः। नियन्तृशून्ये, स्वामिशून्ये च।

**अनीह** त्रि० ईह—भावे अङ् न०ब०। स्पृहाशून्ये, निश्चेष्टे च।

**अनु** अव्य० अन—उ। “अनु वेदाध्ययनानुष्ठानसामीप्यपश्चाद्भावानुबन्धसाम्याभिमुख्यविसर्गलक्षणेष्विति” गणरत्नोक्तेषु अर्थेषु तत्र वेदे अनुवाक इति। अध्ययने अन्वधीते, अनुष्ठाने, अनुतिष्ठति, सामीप्ये अनुमेघं वर्षति, पश्चाद्भावे तदनु, अनुबन्धने, अनुशेते अनुशयः, साम्ये, अनुकरोति, आभिमुख्ये अनुमातरं वत्सोधावति, हीने अनु हरिं सुराः विसर्गे (प्रवृत्त्यप्रतिबन्धे) अनुजानीते, लक्षणे अनु वनमशनिर्गतः”। “अनुर्लक्षणे” इति “तृतीयार्थे” इति (सहार्थे) “हीने” इति, लक्षणेत्थम्भूताख्यानभाग वीप्सासु प्रतिपर्य्यनव इति, च (पा०) उक्तेषु अर्थेषु, तत्र लक्षणे, जपमनुप्रावर्षत्। “हेतुभूतजपोपलक्षितम् वर्षणम्” सि०कौ० सहार्थे, नदीमनु अवसिता सेना, “नद्या सह संबद्धा सेना” सि०कौ० हीने, हरिमनु सुराः हरेर्हीना इत्यर्थः, लक्षणे वृक्षमनु विद्योतते विद्युत्, तत्र च वृक्षप्रकाशेन विद्युद्विद्योतदेशज्ञापनात् वृक्षो लक्षणमिति प्रौ०मनो०। (इत्थम्भूतः) कञ्चित् प्रकारं प्राप्तः आख्यायते अनेन, इत्थम्भूताख्यानं प्रकारविशेषनिरूपकं तस्मिन्नर्थे, यथा भक्तोहरिमनु, हरेरित्थम्भूतः, भक्तिविशेषयुक्त इत्यर्थः। भागे भागोऽस्यास्ति अर्शआद्यच् भागस्वामिनि, हरिमनु लक्ष्मीः, हरिस्वामिकभागवतीत्यर्थः। वीप्सायां, विषयभूतायां, वृक्षं वृक्षमनु सिञ्चति, यावद्वृक्षव्यापकः सेकः। इयांस्तु भेदः अन्यत्रानुशब्दः तत्तदर्थस्य द्योतकः अत्र तु द्विवचनेनैव व्याप्तिबोधनात् अनोस्तद्विषयत्वमात्रम्। पाणिन्युक्तेष्वेष्वेवार्थेष्वस्य कर्म्मप्रवचनीयसंज्ञा तेन तद्योगे द्वितीया एवं कर्म्मप्रवचनीयसंज्ञया गत्युपसर्गसंज्ञयोर्बाधनात् न सत्वादि न वा अनुव्यचलदित्यादौ गतिर्गतावित्यादिना निघातः। “अनुर्यत् समया इति” “यस्य चायाम इति च” (पा०) उक्ते सामीप्ये, अनुवनमशनिर्गत इति वनसमीपं गत इत्यर्थः आयामे, अनुगङ्गं वाराणसी, गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षिता वाराणसीत्यर्थः नित्यसमासः योग्यत्वे च। अनुरूपम्। “रूपादियोग्यमिति” सि०कौ०, अनुक्रमम्। क्रमानतिक्रमे अत्रापि नित्यसमासः एतेषामुदाहरणानि शास्त्रान्तरेषु दृश्यानि दिङ्मात्रमुदाह्रियते। तत्र पश्चादर्थे “तदनु ननु कयासौ ब्रूहि यातोऽध्वदृश्येति” लीला०। “तदनु ज्वलनं मदर्पितमिति” कुमा० असौ “कुमारस्तमजोऽनु-